शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पण: अष्टम: परिच्छेद:

## गुणालङ्कारयो: भेद प्रदर्शन पूर्वकं गुणस्य लक्षण विवेचनम् ।

ननु लोके गुणा: शौर्यादय: समवायेन हारादय: अलंकारा: शरीरे संयोग सम्बन्धेन सम्बद्धा इति लोके गुणालंकार भेदो भवतु नाम काव्ये पुनर्माधुर्यादीनां गुणानां उपमादीनाम् अलंकाराणां समवायेनैव वृत्त्या गुणालंकारयोर्न भेद इति न वाच्यम्। यथाहि लोके आङ्गिकम् आत्मन: आत्मन उत्कर्ष हेतुत्वात् शौर्यादयो: गुणशब्द वाच्या: तथा काव्येऽपि आङ्गिकस्य आत्मस्य रसस्य धर्मा: स्वरूप विशेषा माधुर्यादयोऽपि स्वाश्रय रस व्यञ्जके वाक्यस्य काव्य व्यपदेश: औपाधिकात् गुणत्वं भाज: इत्यर्थ: । एवं काव्य व्यवहार प्रयोजकत्वे सति रस धर्मत्वं गुणत्वम् इति । रसभावत् अति व्याप्ति वारणाय सति अन्तरम् । अलंकारेषु अति व्याप्ति वारणाय विशेष्य दलम् । एतेनेदं सिद्धं यत् - रसमात्र धर्मत्वम् गुणत्वम्, शब्दार्थ धर्मत्वम् अलङ्कारत्वम् इति ।

अपि च यथा लोके: धर्मा: शौर्यादय: नियता अपरिहार्याश्च तथैव काव्यस्य आत्मभूते रसे गुणानां स्थिति: नियता अपरिहार्या च । एवञ्च अलङ्काराणां अपरिहार्यता न इति अपि सिद्धम् ।

उपेन्द्र झा
27/8/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
फुरकैना, कुशियाँ

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)
(साहित्य दर्पणः पञ्चम परिच्छेदः)

लक्षणाऽभिधे रसस्य बोधिके न वा?
इति विचारम्।

'प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।
किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा॥'

कुतो नेति चेत्! नन्‌ लक्षणया अभिधया वा रसादिबोधः स्वीक्रियते। न। शब्दव्यापारात् पूर्वं रसस्य सत्त्वं न। अतो रसस्य लक्षणाभिधे न बोधिके। अभिधा लक्षणा च विद्यमानं वस्तुन एव बोधात्। 'गङ्गायां घोषः' इत्यत्र गङ्गातटस्य पूर्वं सिद्धौ। अतो गङ्गापदम् अभिधया प्रवाहं लक्षणया च तटं बोधयति। अभिधेये वस्तुनि न अनयोः प्रयोगः। न हि रसः लौकिकं व्यापारेण भिन्नो रसादि प्रतिपाद्यः कोऽपि पदार्थः प्रमाणसिद्धोऽस्ति। अतः रसे लक्षणाभिधे बोधयितुम्।

किञ्च मुख्यार्थस्य बाधदशायामेव लक्षणाया अवतारः। उक्तञ्च उदयनाचार्येण —

'श्रुतान्वयादनाकाङ्क्षं वाक्यं ह्यन्यद्विवक्षति।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः॥'

साक्षात् श्रुत पदानां (पदार्थानां) परस्परं अन्वय बोधे जाते वाक्यं न किमपि अन्यत् इच्छति। किन्तु यदि परस्परं अन्वयस्य वैधुर्यम् = अनुपपत्तिः भवति तदा आक्षिप्तेन = बोधजन्य सम्बन्धेन अर्थेन सङ्गतिः = अर्थात् अन्वयो विधीयते। किन्तु 'शून्यं वासगृहं' इत्यादि रसोदाहरणे न मुख्यार्थबाधः इति न लक्षणाया अवसरः।

न च 'गङ्गायां घोषः' इत्यत्र शैत्यपावनत्वादिकं प्रयोजनं लक्ष्यम् = लक्षणया बोध्यम्। एवं सति गङ्गापदस्य तटरूपोऽर्थो मुख्यः स्वीकर्तव्यो भविष्यति। स च बाधितोऽपि भविष्यति। शैत्यपावनत्वादेः प्रयोजनस्य लक्षणया तस्यापि प्रयोजनान्तरम्। एवं मूलक्षतिकारी अनवस्था भवेत्।

न प्रयोजनविशिष्टे तीरे लक्षणेति वाच्यम्। विषयप्रयोजनयोः युगपत् प्रतीति अनभ्युपगमात्। नीलादि संवेदनान्तरमेव हि ज्ञातायाः अनुव्यवसायस्य वा सम्भवः। अतो न लक्षणाभिधे रसस्य बोधके इति सिद्धम्।

उपेन्द्र झा
२१/४/२०
एसो० प्रो० साहित्य
रा० उ० सं० महाविद्या
कुरसेला, पूर्णियाँ

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

साहित्य दर्पण: द्वितीय: परिच्छेद:

## साहित्यिका: कुत्र शक्तिग्रहं मन्यन्ते कुत्र न इति यथाशास्त्रं प्रतिपादनम्

साहित्य दर्पणस्य द्वितीयपरिच्छेदे आचार्य विश्वनाथेन महाभाष्यकारस्य 'चतुष्टयी शब्दानां प्रवृत्तिः' इति मत्वा चतुर्विधाः शब्दाः कथ्यन्ते। जाति शब्दाः, गुण शब्दाः, क्रिया शब्दाः, द्रव्य शब्दाश्चेति चतुर्विधाः।

तत्र गो पिण्डादिषु गोत्वादिका जातिः। गुणो विशेषाधान हेतुः सिद्धो वस्तुधर्मः। शुक्लादयो हि गुणाः गवादिकं सजातीयेभ्यः कृष्ण गवादिभ्यो व्यावर्तयन्ति। क्रियाः साध्य रूपाः वस्तुधर्माः पाकादयः। एषु हि अधिश्रयणाऽवश्रयणान्तादि पूर्वापरीभूतो व्यापार कलापः पाकादिशब्द वाच्यः। द्रव्यशब्दा एक व्यक्तिवाचिनो हरिहरडित्थडवित्थादयः। द्रव्य शब्दा एव यदृच्छाशब्दाः। एष्वेव व्यक्तेः उपाधिषु सङ्केतो गृह्यते न व्यक्तौ। आनन्त्य व्यभिचार दोषापातात्। उक्तं हि ग्रन्थकारेण —

'सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च' इति।

ननु व्यक्तौ शक्तिग्रहे कथम् आनन्त्यं व्यभिचारश्चेति चेत्? श्रूयताम् —

उपाधिषु शक्तिं स्वीकारे एकस्यां व्यक्तौ जाति शक्तौ गृहीतायां सर्वत्र कार्यं चलति। सामान्य लक्षणासन्निकर्षेण सर्वासां बोधस्य भवति। यदि व्यक्तौ शक्तिग्रहः स्वीक्रियते तदा प्रश्नो जायते यद् – एकस्यां व्यक्तौ सङ्केतग्रहो भवति उत सर्वासाम्? तत्र न प्रथमः। गवादीनां व्यक्तीनाम् अनन्तत्वात्, अनन्त व्यक्तिषु अनन्त शक्ति कल्पना गौरवात् आनन्त्यं स्यात्। एकस्यामेव दृष्ट व्यक्तौ शक्तिग्रहे तदतिरिक्तानां गो व्यक्तीनां ज्ञानमेव न स्यादिति व्यभिचारः पदार्थोपस्थितेः शक्तिग्रहस्य कारणत्वात्। न चैकस्यां व्यक्तौ शक्तिग्रहे अन्यासां व्यक्तीनां शक्तिग्रहं विनैव उपस्थितिरिति वाच्यम्, शक्तिग्रहं विना पदार्थोपस्थितौ स्वीकृतायां कारणाभावे कार्योत्पत्ति रूप व्यभिचार दोषापातात्। अपि चैवं गो शब्देन अश्वादीनामपि उपस्थितिः स्यात्। नापि द्वितीयः - भूत-भविष्य-वर्तमानानां समस्तानां गो-व्यक्तीनां एकस्मिन् समये उपस्थित्यभावेन शक्तिग्रहासम्भवादिति दिक्।

---

उपेन्द्र झा
२७/४/२०
सहा० प्रो० साहित्य
रा० उ० सं० महावि०
कुलेठना, झुंझुनूं